श्री महालक्ष्म्यष्टकम्

Shri Mahalakshmi Ashtakam

Source: Wikimedia Commons — Brihat Stotra Ratnakara 1912 public-domain scan, stable file revision (item 75 on scan page 176). Also compared: Public Domain Mark 1.0; Sanskrit Wikisource — Shri Mahalakshmyashtakam, fixed comparison revision 54882 (CC BY-SA 4.0).

VERSE 1

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते।
शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते॥१॥

Namaste'stu Mahāmāye Śrīpīṭhe Surapūjite |
Śaṅkhacakragadāhaste Mahālakṣmi Namo'stu Te ||1||

VERSE 2

नमस्ते गरुडारूढे कोलासुरभयङ्करि।
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते॥२॥

Namaste Garuḍārūḍhe Kolāsurabhayaṅkari |
Sarvapāpahare Devi Mahālakṣmi Namo'stu Te ||2||

VERSE 3

सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि।
सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तु ते॥३॥

Sarvajñe Sarvavarade Sarvaduṣṭabhayaṅkari |
Sarvaduḥkhahare Devi Mahālakṣmi Namo'stu Te ||3||

VERSE 4

सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि।
मन्त्रमूर्ते सदा देवि महालक्ष्मि नमोऽस्तु ते॥४॥

Siddhibuddhiprade Devi Bhuktimuktipradāyini |
Mantramūrte Sadā Devi Mahālakṣmi Namo'stu Te ||4||

VERSE 5

आद्यन्तरहिते देवि आद्यशक्ति महेश्वरि।
योगजे योगसम्भूते महालक्ष्मि नमोऽस्तु ते॥५॥

Ādyantarahite Devi Ādyaśakti Maheśvari |
Yogaje Yogasambhūte Mahālakṣmi Namo'stu Te ||5||

VERSE 6

स्थूलसूक्ष्ममहारौद्रे महाशक्ति महोदरे।
महापापहरे देवि महालक्ष्मि नमोऽस्तु ते॥६॥

Sthūlasūkṣmamahāraudre Mahāśakti Mahodare |
Mahāpāpahare Devi Mahālakṣmi Namo'stu Te ||6||

VERSE 7

पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि।
परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तु ते॥७॥

Padmāsanasthite Devi Parabrahmasvarūpiṇi |
Parameśi Jaganmātar Mahālakṣmi Namo'stu Te ||7||

VERSE 8

श्वेताम्बरधरे देवि नानालङ्कारभूषिते।
जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते॥८॥

Śvetāmbaradhare Devi Nānālaṅkārabhūṣite |
Jagatsthite Jaganmātar Mahālakṣmi Namo'stu Te ||8||

VERSE 9

महालक्ष्म्यष्टकस्तोत्रं यः पठेद्भक्तिमान्नरः।
सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा॥९॥

Mahālakṣmyaṣṭakastotraṃ Yaḥ Paṭhed Bhaktimān Naraḥ |
Sarvasiddhimavāpnoti Rājyaṃ Prāpnoti Sarvadā ||9||

VERSE 10

एककाले पठेन्नित्यं महापापविनाशनम्।
द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः॥१०॥

Ekakāle Paṭhennityaṃ Mahāpāpavināśanam |
Dvikālaṃ Yaḥ Paṭhennityaṃ Dhanadhānyasamanvitaḥ ||10||

VERSE 11

त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम्।
महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा॥११॥

Trikālaṃ Yaḥ Paṭhennityaṃ Mahāśatruvināśanam |
Mahālakṣmīr Bhavennityaṃ Prasannā Varadā Śubhā ||11||

MAHALAKSHMI ASHTAKAM COLOPHON — NOT VERSE 12

इतीन्द्रकृतः श्रीमहालक्ष्म्यष्टकस्तवः सम्पूर्णः॥

Itīndrakṛtaḥ Śrīmahālakṣmyaṣṭakastavaḥ Sampūrṇaḥ ||